दिनाङ्क :- 11.10.2024

सायं - 06:20

<u>मुख्यवार्ताः</u>

- भारत-लाओ पीडीआर इत्येतयो: षट् सहमिति: पत्राणां संधौ हस्ताक्षरं जातम्।
- जलाप्लावितेन साहय्यक अनुदान रूपेण बिहार प्रशासनेन एक-विंशति: सहसत्रोत्तर त्रिलक्ष परिवारेभ्य: पञ्चविंशत्युत्तर द्विशत कोटितोप्यिधक राशि: अंतरितानि।
- भारतम् लेबनान इत्यस्य सुरक्षा-स्थित्याः विषये च चिन्तितः अस्ति।
- अशेषेहिदेशे दुर्गा-पूजनोत्सव: सश्रद्धं सोल्लासं च आमान्यते। अद्य तावत् महाअष्टमी, महानवमी च विश्वस्मिन् हि विश्वे आचर्यते।
- महिला-विंशति: प्रतिविंशति: विश्व-चषक-क्रिकेट-प्रतिस्पर्धायां अद्य सायं दुबई-अन्तर्राष्ट्रीय-क्रिकेट-क्रीडाङगणे ऑस्ट्रेलिया-दलं समुह ए इत्यस्य पाकिस्तान-दलेन सह क्रीडिष्यति।

<u>प्रधानमन्त्री</u>

प्रधानमन्त्री नरेन्द्र मोदी अब्रवीत् यत् भारतस्य एक्ट-ईस्ट इत्येषा प्रतिवेशि – प्रथम-नीति: आसिसान-देशीय-संबंधान् नूतनाम् ऊर्जां, गतिं दिशां च अयच्छत्। तेन सबलं प्रतिपादितं यत् एकविंशी शताब्दी भारतस्य आसियान-देशानां च अस्ति। लाओ-राजधान्यां वियंचने ह्य: भारतासियान-शिखर-सम्मेलने प्रधानमन्त्री अवदत् भारतम् आसियान-देशा: च शान्तिप्रिय-राष्ट्राणि सन्ति। अपि च, एतानि परस्परम् अखण्डताया: संप्रभुताया: च सम्मानं कुर्वन्ति। प्रधानमंत्री अवोचत् यत् यदा विश्वे अनेकेषु भागेषु साम्प्रतम् आपीड-मतभेदादिकं दृश्यते, तदा भारतासियान देशेषु मित्रता-सहयोग-संवाद-सहभागिता: अतितरां महत्तवपूर्णा: सन्ति। श्री मोदी न्यगदयत् यत् विगतेषु दश-वर्षेषु आसियान-क्षेत्रै: सह भारतस्य व्यापार: संवर्ध्य द्विगुणित: अर्थात् त्रयोदश-कोटि-

डॉलरत: अधिक: संवृत्त:। एतद् अतिरिच्य, अत्र सम्मेलने प्रधानमन्त्री विभिन्नै: आसियान-नेतृभि: समम् अपि द्वि-पाक्षिक-चर्चाम् अकरोत्।

भारत-लाओ पीडीआ इत्येतयो: षट् सहमिति: पत्राणां संधौ हस्ताक्षरं जातम्। भारत-संयुक्त राष्ट्र विकास साहय्य कोष माध्यमेन लाओ इत्यत्र पोषण सुरक्षायां परिष्काराय मिलियन अमेरिका डॉलर इत्यस्यवित्तीय सहायता प्रदानार्थं निर्णयं स्वीकृतम्।

<u>बिहार</u>

जलाप्लावितेन साहय्यक अनुदान रूपेण बिहार प्रशासनेन एक-विंशति: सहसत्रोत्तर त्रि लक्ष परिवारेभ्य: पञ्चविंशत्युत्तर द्वि शत कोटि तोप्यिधक राशि: अंतरितानि। पटनायां ह्य: मुख्य-मंत्री सचिवालये एकस्मिन् उपवेशावधौ मुख्यमन्त्री नीतिश-कुमार: प्रत्यक्ष लाभ अंतरणस्य माध्यमेन अनुदानस्य द्वितीयो भाग: लाभार्थिनां वित्तकोषे प्रेषितवान्। राज्य सर्वकार: जलाप्लावन आपद् उद्धार साहाय्यहृय नूतन प्रावधानुगुणं प्रत्येक पीडितपरिवारेभ्य: सप्त सहस्त्र रुप्यकाणि प्रदत्तानि यत् पूर्वं षट् सहस्त्रम् आसीत्। एतदतिरिच्य सस्यानां या क्षति: जाता तदर्थमपि राज्यसर्वकार: नवति: अधिक चतु: शतोत्तर कोटि: रुप्यकाणां दानस्य घोषणां अकरोत्।

<u>लेबनान्-देशस्य स्थितिं प्रति भारतं चिन्तां प्रकटयति।</u>

विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत्, "नवदेहली निरन्तरं स्थितिं निरीक्षमाणः अस्ति, ब्लू लाइन इत्यस्य पार्श्वे क्षीणतायाः सुरक्षा-स्थित्याः विषये च चिन्तितं अस्ति"। मन्त्रालयः अवदत् यत् "संयुक्तराष्ट्रसङ्घस्य परिसरस्य अखण्डतायाः सर्वैः आदरः कर्तव्यः, संयुक्तराष्ट्रसङ्घस्य शान्तिरक्षकाणां सुरक्षायै, तेषां अधिकारस्य पवित्रतायै च समुचितानि उपायानि कर्तव्यानि" इति।

विराम:

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

दुर्गा पूजा

अशेषेहिदेशे दुर्गा-पूजनोत्सव: सश्रद्धं सोल्लासं च आमान्यते। पश्चिम्-बंगाले, बिहारे, उडीसायां देशस्य भिन्नभागेषु च जना: दुर्गा-पूजन-समारोहेषु सोत्साहं भागं गृह्णान्ति। असमप्रदेशे चतुस्सहस्त्राधिकानि दुर्गा-पूजन-स्थलनि निर्मितानि। अस्माकं वार्ताहरै: संसूचितं यत् पूजन समितिभि: विभिन्नेषु विषयेषु रचनात्मकरीत्या संदेशं प्रसारयितुं अस्थायि-दुर्गा-पूजन-स्थलं सज्जीकृतम्।

राष्ट्रपति: द्रौपदी-मुर्मु: दुर्गापूजावसरे देशवासिन: प्रवासिनश्च वर्धापितवती। तया प्रोक्तं यत् शौर्य-प्रतीकरुपायै दुर्गा देव्यै समर्पितम् एतत् पर्व असत: उपरि सत: विजयस्य प्रतीकरूपमस्ति।

बालिका दिवस:

अद्य अन्तार्राष्ट्रीय बालिका दिवसो विश्विस्मन् हि विश्वे आचर्यते। दिवसोऽयं लैंगिंक समानया:, शिक्षाया: अवसरानां च महत्वं प्रकाशयीता अस्मिन् वर्षे बालिकानां भविष्यदृष्टि: इति विषयो विद्यते। अन्तर्राष्ट्रीय बालिकादिवस: बालिकानां सशक्तिकरणस्य तासां मानवाधिकारस्य सुरक्षाया: अद्यत्वे आवश्यकतां च प्रकाशयति।

ऋतु विभाग

भारतीय ऋतु विज्ञान विभागेन आगामी द्वित्रदिवसेषु तमिलनाडु, पुडुचेरी, कराईकल, दक्षिण आंतरिक कर्नाटक, कोंकण, गोवा, गुजरात, मध्य महाराष्ट्र, सौराष्ट्र कच्छस्य च केषुचित् क्षेत्रेषु तीव्रवृष्टि: अनुमानिता। विभागानुसारं अग्रिम द्वित्रदिव- सावधौ उत्तरी आंतरिक कर्नाटक -रायलसीमा, तेलङ्गाना तटीय आंध्र प्रदेश यनमे च अत्यल्प वृष्टि: सम्भाव्यते।

पीएम जयप्रकाश-नाना देशमु

प्रधानमन्त्री नरेन्द्र मोदी अद्य लोकनायकं जयप्रकाशनारायणंप्रीत अथ भारत रत्न नानाजी देशमुखं प्रति अपि तयो: जन्म जयन्त्यवसरे श्रद्धांजलिं समर्पितवान्। प्रधानमन्त्रिणा एकस्मिन् सामाजिक-अन्तर्जालीय पटल माध्यमेन जेपी नारायणस्य देशे समाजे च योगदानस्य प्रशंसा कृता। स: अवोचत् यत् तस्य व्यक्तित्वं सर्वान् वर्गान् प्रेरयति। अपरस्मिन् च संदेशे श्री मोदी देशस्य ग्रामीणजनानाम् सशक्तिकरणाय नानार्जीी देशमुखस्य समर्पणं सेवा च स्मरणं कृत्वा तस्य प्रशंसाम् अकरोत् ।

द्यूत

महादेव द्यूत तंत्रांशस्य प्रमुख: सौरभ चंद्राकर: अद्य दुब्य्यां निगडित:। प्रवर्तन निदेशालयेन गतवर्षे तस्य निगडनस्य विषये रक्त कॉर्नर सञ्चेतना प्रकाशिता। संसूच्यते यत् चंद्रकरस्य प्रत्यर्पणप्रक्रिया आरब्धा, सम्भाव्यते च यत् एकसप्ताहाभ्यन्तरे तं भारतं पुन: आनयितुं शक्यते।

बाङ्ग्लादेश

बाङ्ग्लादेशे सतखिरा-नगरस्य जेशोरेश्वरी-मन्दिरे कालीदेव्याः मुकुटः हृयः अपहृतः। एकविंशत्यधिक द्विसहस्रतं तमे वर्षे मार्च-मासे बाङ्ग्लादेशस्य प्रवासकाले प्रधानमन्त्रिणा नरेन्द्रमोदिना जशोरेश्वरी-काली-मन्दिरे मुकुटोऽयं उपहाररूपेण दत्तः इति

बाङ्ग्लादेशस्य भारतीय-उच्च-आयोगेन अन्तरजालीय-माध्यमेन सूचिता। उच्च-आयोगः गभीरां चिन्तां प्रकटय्य बाङ्ग्लादेश-सर्वकारम् आग्रहम् अकरोत् यत् मुकुटं पुनः प्राप्य अपराधीनां विरुद्धं कार्यम् आचरतु इति। प्रसारमाध्यमानां प्रतिवेदनायाः अनुसारं, स्थानीयाः आरक्षकाः घटनायाः पुष्टिं कृतवन्तः, ते च चोरं ज्ञातुं मन्दिरस्य सी. सी. टी. वी. दृश्यानि समीक्षितवन्तः। जशोरेश्वरी-कालीमन्दिरं हिन्दुधर्मस्य एकपञ्चाशत् शक्तिपीठेषु अन्यतमम् अस्ति।

## टाटा

नोयेल टाटा अद्य सर्वसम्मत्या टाटा-समूहस्य परोपकारी-शाखायाः टाटा-ट्रस्ट्स् इत्यस्य अध्यक्षत्वेन नियुक्तः। बुधवासरे षडाशितिः वर्षीय रतन टाटा वर्यस्य पञ्चत्वेविलीनानन्तरं आयोजिते बोर्ड-उपवेशने अयं निर्णयः कृतः।

## पाकिस्तान-आक्रमणम्

पाकिस्तान-देशे अद्य प्रातः बलूचिस्तान-प्रान्तस्य दुक्की-क्षेत्रे अज्ञातः शस्त्रधारिणः एकः अङ्गारखनिजम् आक्रम्य न्यूनातिन्यूनं विंशतिः कार्यकर्तारः मृताः अष्टौ च व्रणिताः। आक्रमणकारिणः ग्रेनेड इत्येतान्, रॉकेट्-प्रक्षेपकान् च प्रयुक्तवन्तः। पाकिस्तानदेशे हिंसायाः श्रृङ्खलायां एषः नवीनतमः आक्रमणः अस्ति।

## संस्कृत-साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धेक- वादनतः भविष्यति। कृपया श्रृष्वन्तु भवन्त्रः सर्वे श्रोतु प्रभवन्ति । भवति, आशिसे भवन्तः प्रति निवास- श्रीष्यन्तीति।

महिला- टी-20

महिला-विंशतिः प्रतिविंशतिः विश्व-चषक-क्रिकेट-प्रतिस्पर्धायां अद्य सायं दुबई-नगरस्य दुबई-अन्तर्राष्ट्रीय-क्रिकेट-क्रीडाङ्गणे ऑस्ट्रेलिया-दलं समुह ए इत्यस्य पाकिस्तान-दलेन सह क्रीडिष्यति। ह्यः समूह बी इत्यस्य वेस्टइंडीज-दलं संयुक्त-अरब-अमीरातस्य शारजाहा-क्रिकेट-क्रीडाङ्गणे बांग्लादेश दलं अष्ट स्तोभैः पराजितम्।

।।इति वार्ताः।।